# पञ्चमोऽध्यायः

# पञ्चमोऽध्यायः

## (उपसंहारात्मकः, निष्कर्षात्मकश्च)

### ५.१. वैदिकवाङ्मयस्य संक्षिप्तो विमर्शः

वेदस्य द्वौ सम्प्रदायौ पूर्वसूरिभिर्मन्येते– ब्रह्मसंप्रदायः आदित्यसम्प्रदायश्चेति । प्राच्यनयेन पौराणिकाध्ययनेन सर्वविदितमिदं यत् सृष्ट्यारम्भे ब्रह्मा वेदचतुष्टयं प्रवर्तितवानिति । सोऽयं वेदो ब्रह्माणा प्रमुखेभ्यः स्वशिष्येभ्यः समुपदिष्टः । अयमेव वेदो ब्रह्मसम्प्रदायप्राप्त इत्यभिधीयते । एतदतिरिक्तं योगिना याज्ञवल्क्येन भगवतः सूर्यस्य समाराधनेनाधिगतः यः शुक्लयजुर्वेदः पञ्चदशशाखात्मकः स आदित्यसम्प्रदायप्राप्त इति संज्ञाप्यते ।

वैदिकवाङ्मयेषु यज्ञस्य महत्त्वं यत्र तत्र समुपलभ्यते । वैदिकधर्मे यज्ञः वेदस्य प्राणाः आत्मा च कथ्यते । भगवतः वेदस्य आविर्भावः यज्ञसम्पादनार्थमेव अस्तीति मनुना उदीरितम् अग्निवायुरविभ्यस्तु..... ।

वैदिकयुगे श्रौतयागस्य बाहुल्यमासीत् । स्मार्तयज्ञस्य चर्चा न दरीदृश्यते संहितायाम् । संहितायामग्निहोत्रदर्शपूर्णमासचातुर्मास्यसोमसंस्थाऽश्वमेधवाजपेयप्रभृतिसोम– यागानां वर्णनं दरीदृश्यते । विष्णु–रुद्रशतचण्डीसहस्रचण्डीप्रभृतियागानां नामोल्लेखनमपि नोपलभ्यते । यद्यपि गर्भाधानादिषोडशसंस्काराणां स्मार्तकर्मणां नामोल्लेखनं येन केनापि रूपेण वैदिकसाहित्ये उपलभ्यते । प्रतीयते यत् स्मार्तयागानां प्रचलनं वैदिकसाहित्यात् बहुकालानन्तरं अभवत् । श्रौतसूत्रं श्रौतयागस्य विधानं करोति, स्मार्तकर्मणाञ्च प्रतिपादनं गृह्यसूत्रं करोति ।

सनातनहिन्दूधर्मे यज्ञानां प्रभूतं महत्त्वं प्रतिपाद्यते । धर्मेऽस्मिन् वेदानां यन्महत्त्वमस्ति तन्महत्त्वं यज्ञानामपि प्राप्यते । अस्य मुख्यं कारणमिदमस्ति यत् वेदानां प्रधानविषयः यज्ञ एवास्ति । अस्याः सृष्टेः सञ्चालिकायाः ईश्वरशक्तेर्नाम देवता अस्ति । इमाः नैकाः शक्तयः विविधदेवनामभिः कथ्यन्ते । निखिलस्यापि संसारस्य विविधसमस्याभिः सह मानवस्य वैयक्तिकस्य जीवनस्य सुखसमृद्ध्युन्नत्यवनतिलाभहानिरोगशोकानामस्ति गहनः सम्बन्धः ।

आसां देवशक्तीनामनुकूलतां प्राप्यैव मनुष्यो अतीव सारल्येन स्वोन्नतिं कर्तुं शक्नोति। देवशक्तीनामनुकूलतायै यावन्त्यपि साधनानि यज्ञक्रियादिक्षेत्रेषु प्राप्यन्ते, एषु यज्ञ एव सर्वश्रेष्ठः अस्ति यथोक्तं **यज्ञो वै श्रेष्ठतमं कर्म** इति। अस्य मुख्यकारणमिदमस्ति यज्ञाद् देवाः प्रसीदन्ति साधकस्य चाभीष्टसिद्धिर्भवति।

वैदिकयज्ञानां द्वौ भेदौ स्तः। श्रुतिप्रतिपादितो यज्ञः श्रौतयज्ञः इत्युच्यते। श्रौतयज्ञेषु वेदमन्त्राणामेव प्रयोगो भवति। स्मृतिप्रतिपादितो यज्ञः स्मार्तयज्ञ इत्युच्यते। स्मार्तयज्ञेषु वैदिकपौराणिकतान्त्रिकभृतयः मन्त्राः प्रयुज्यन्ते। अस्मिन् शोधप्रबन्धे प्रथमन्तावत् वैदिकवाङ्मयस्य संक्षिप्तं परिचयं तथा श्रौतयागानां संक्षिप्तरूपेण परिचयं प्रस्तूय विविधश्रौतयागगतानां पारिभाषिकशब्दानां परिशीलनं विहितम्। दिवसमेकमारभ्य सहस्रसम्वत्सरपर्यन्तं सम्पाद्यमानानां यागानां प्रतिपादनं ताण्ड्यमहाब्राह्मणे उपलभ्यते। अत्र शोधप्रबन्धे कातीयश्रौतसूत्रे जातं भाष्यत्रयमधिकृत्य परिशीलनं विहितम्। अनेन परिशीलनकर्मणा भाष्यकाराणां परिश्रमः तेषां महत्त्वज्ञानञ्च सारल्येन जायते। अत एव मया एष प्रयत्नः विहितः। इतः पूर्वं एतादृशे श्रौतसूत्रभाष्यपरिशीलनकर्मणि विदुषां रुचिः नैवजाता दृश्यते। एतादृशे महत्त्वाधायके कर्मणि वैदिकविदुषां रुचिर्प्रसारिता भवेत्। तेन च श्रौतयागजिज्ञासवः उपकृताः भवन्ति।

प्रेयसी सम्प्रवृत्तानां गृहस्थाश्रमिणां कृते नान्तरीकतया समावश्यकानां श्रौतस्मार्तादिकर्मकाण्डानां संविधानं देवेषु तथा विनियोगविधिविधानञ्च विस्तरेण ब्राह्मणग्रन्थेषु समुपलभ्यते। उक्त कर्मकाण्डीयविधानानां, विनियोगविध्यादीनाञ्च वर्गीकृतानुगतरूपेणाभिज्ञानार्थं शाङ्खायन-मानव-आपस्तम्ब-बौधायन-कात्यायन-आर्षेय-आङ्गिरसप्रभृतिऋषिप्रवरैः विविधेषु सूत्रेषु कल्पस्यास्य समुद्भावनं कृतं सम्प्रतिपद्यते।

कल्प्यते, कृतिसाध्यत्वेनेष्टसाधनत्वेन च यज्ञाद्यनुष्ठानादीनां विनियोगविध्यानुकूल्येन विधानं क्रियत अस्मिन्निति कल्प इति शब्दानुशासनानुसारेण चतुर्विधवेदानां षडङ्गान्यतमेषु कल्पसूत्रेषु वेदप्रतिपादितकर्मकाण्डानां, विशेषतया श्रौतकर्मकाण्डानां विस्तृताविस्तृतविधाभ्यां सम्पाद्यमानाया उपक्रमपुरःसरायाः प्रविविक्तायाः क्रमपूर्वकव्यवस्थायाः

संविहितविनियोगदृशाऽनुगतरूपेण तावत्परिकल्पनं भवतीति कृत्वा वेदाङ्गकल्पसूत्राणामेतेषां वैदिककर्मकाण्डत्वं नूनं प्रावगम्यते । ब्राह्मणग्रन्थेषु विस्तृताविविक्ततया प्रतिपादितानां श्रौतयज्ञादिसम्बद्धविधिविधानानां व्यवस्थितसंक्षिप्तानुगतरूपेण समुच्चयात्मकं परिकल्पनं कल्पसूत्रेषु, विशेषतया श्रौतसूत्रेषु संविहितमस्तीति महानियानमीषां विशेषः प्रतिभाति।

कल्पसूत्रेषु श्रौतसूत्राणि, स्मार्तसूत्राणि, शुल्वशूत्राणि चान्तर्भवति । स्मार्तसूत्रेषु धर्मसूत्राणि, गृह्यसूत्राणि, चान्तर्भूतानि सन्ति।

## ५.२. श्रौतसूत्राणि

एतेषु गार्हपत्य-दक्षिणाग्नि-आहवनीयानां त्रयाणामग्नीनां संस्थापनादीनां विधानं, दर्शपूर्णमास-चातुर्मास्य-सौत्रामणि-अग्निष्टोम-अत्यग्निष्टोम-वाजपेय-सोमादि श्रौतयागानां साङ्गोपाङ्गं विधिविधानं, तद्विषयकसमस्त नियमादीनाञ्च विवरणं विहितं वरीवर्ति।

## ५.३. धर्मसूत्राणि (स्मार्तसूत्रान्तर्गतानि)

एषु पञ्चस्मार्तयज्ञानां, ब्रह्मयज्ञ-देवयज्ञ-पितृयज्ञ-भूतयज्ञ-नृयज्ञानां विधानं, वर्णाश्रमधर्माणां विवरणं, नित्यनैमित्तिककर्त्तव्यानां विधानं, नीतिनिष्ठार्याचाराणां, पालन-संरक्षणात्मकराजव्यवहाराणां, न्याय्यनिर्णयानां, प्रायश्चित्तादीनाञ्चविधानं वैशद्येन कृतमुपलभ्यते।

## ५.४. गृह्यसूत्राणि (स्मार्तसूत्रान्तर्गतानि)

एतेषु गृह्याग्निविधानं, द्विजानां नित्य-नैमित्तिक-काम्यकर्मणां विविक्तं विवरणं, गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-निष्क्रमण-अन्नप्राशन-चूडाकर्म-कर्णवेध-विद्यारम्भ-उपनयन-वेदारम्भ-केशान्त-समावर्तन-विवाह-अन्त्येष्टिरूपाणां षोडशसंस्काराणां विधानञ्चविहितमस्ति।

## ५.५. शुल्वसूत्राणि

अमीषु यज्ञवेदीकुण्डमण्डपादीनां निर्माणविधानं, एतन्निर्माणेषु समुपयुक्तानामिष्टिकादीनां तथैतद्विषयकसमस्तनियमानां विवरणं विहितमभ्युपगम्यते।

## ५.६. ऋक्शाखासम्बद्धानि सूत्राणि

आश्वलायन श्रौतसूत्रं गृह्यसूत्रं च । शाङ्खायनश्रौतसूत्रं गृह्यसूत्रं, शुल्वसूत्रञ्च । कौशीतकश्रौतसूत्रं गृह्यसूत्रञ्च । शौनकगृह्यसूत्रम् ।

## ५.७. कृष्णयजुःशाखासम्बद्धानि सूत्राणि

मानवश्रौतसूत्रं, गृह्यसूत्रं, शुल्वसूत्रं, धर्मसूत्रञ्च । मैत्रायणीयश्रौतसूत्रं, गृह्यसूत्रञ्च । काठकश्रौतसूत्रं, गृह्यसूत्रञ्च । वाराहगृह्यसूत्रम् । आपस्तम्बश्रौतसूत्रं, गृह्यसूत्रं, शुल्वसूत्रं, धर्मसूत्रञ्च । हिरण्यकेशीयसत्याषाढश्रौतसूत्रं, गृह्यसूत्रञ्च । बौधायनश्रौतसूत्रं, गृह्यसूत्रं, शुल्वसूत्रं, धर्मसूत्रञ्च । भारद्वाजश्रौतसूत्रं, गृह्यसूत्रञ्च । वैखानसश्रौतसूत्रं, गृह्यसूत्रञ्च । तैत्तिरीयकठसूत्रं, बाधूलगृह्यसूत्रञ्च ।

## ५.८. शुक्लयजुःशाखासम्बद्धानि सूत्राणि

कात्यायनश्रौतसूत्रं, गृह्यसूत्रं, शुल्वसूत्रं, धर्मसूत्रञ्च । वैजवापश्रौतसूत्रं, गृह्यसूत्रञ्च । लौगाक्षिगृह्यसूत्रं, गोभिलीयगृह्यसूत्रं, पारस्करगृह्यसूत्रम् । कात्यायनाष्टादशपरिशिष्टसूत्राणि ।

## ५.९. सामशाखासम्बद्धानि सूत्राणि

आर्षेयश्रौतसूत्रं, गृह्यसूत्रं, शुल्वसूत्रं, धर्मसूत्रञ्च । लाट्यायनश्रौतसूत्रं, गृह्यसूत्रञ्च । जैमिनीयश्रौतसूत्रं, गृह्यसूत्रञ्च । गौतमधर्मसूत्रं, कौथमुगृह्यसूत्रं, कौशिकगृह्यसूत्रं, गोभिलगृह्यसूत्रं, माषकादीनि सूत्राणि ।

## ५.१०. आथर्वणशाखासम्बद्धानि सूत्राणि

आङ्गिरसश्रौतसूत्रं, गृह्यसूत्रं, शुल्वसूत्रं, धर्मसूत्रञ्च । कौशिकगृह्यसूत्रं, वैतानसूत्रं, नक्षत्रकल्पसूत्रं, शान्तिकल्पसूत्रञ्च ।

## ५.११. कात्यायनश्रौतसूत्रस्य प्राचीनभाष्यकाराः

जगतां कल्याणपरम्परासिद्धये आविर्भूतानां अलौकिकोऽपायप्रतिपादकानां वेदानां सन्ति प्रौढानि व्याख्यानानि । तेषां व्याख्याभूतं पाश्चात्यदेशेषु च सविशेषमधीयमानस्य

भाषाविज्ञानस्य मूलभूतं ग्रन्थरत्नं महर्षिणा यास्काचार्येण विरचितं निरुक्ताख्यं शास्त्रम् । यास्कनिर्दिष्टां शैलीमनुसृत्य स्कन्दस्वाम्यादिभिः आचार्यैः ऋग्वेदस्य, उव्वटाचार्यादिभिः शुक्लयजुर्वेदस्य, भवस्वामिगुहदेवादिभिः तैत्तिरीयसंहितायाः माधवादिभिः सामवेदस्य प्रामाणिकानि व्याख्यानानि रचितानि। परन्तु सायणेन सर्वेषु वेदेषु प्रामाणिकं भाष्यमारचितम्। तथैव कात्यायनश्रौतसूत्रेषु प्राचीनैः आचार्यैः प्रामाणिकानि व्याख्यानानि विरचितानि आसन्। एतेषां मध्ये अनेकेषां व्याख्यातृणां नामानि कर्कदेवयाज्ञिकभाष्येषु श्रूयन्ते । कानिचन व्याख्यानानि साम्प्रतं मुद्रितानि प्राप्यन्ते । परन्तु विरलप्रचाराणि बहूनि भाष्याणि नामशेषतां गतानि। एषां नाममात्रं श्रूयते तेऽत्र नाममात्रेण स्मर्यन्ते।

षड्विंशाध्यायेषु विभक्तेऽस्मिन् कात्यायनश्रौतसूत्रे द्वादशभाष्याणि विद्वद्भिरारचितानि सन्ति। तेषु कतिपयभाष्याणि प्रकाशितानि उपलभ्यन्ते चेत् कतिपयभाष्याणि नामान्येव श्रूयन्ते । तेषां संक्षिप्ता टिप्पणी अधः प्रस्तूयते।

### ५.११.१. भर्तृयज्ञः

भर्तृयज्ञमहोदयस्य विषये मनोहरलालद्विवेदिना कात्यायनयज्ञपद्धतिविमर्शाख्ये ग्रन्थे संक्षिप्तः परिचयः प्रदत्तः । तदनुसारेण ज्ञायते यत् असौ साङ्कृत्यायनगोत्रीयः निमिपुत्रः आसीत् । कात्यायनश्रौतसूत्रस्य भाष्येषु भर्तृयज्ञप्रणीतं भाष्यं प्राचीनतमं प्रतिभाति । अनन्तदेवमहोदयेन च स्वभाष्ये भर्तृयज्ञभाष्यस्य संक्षिप्तत्वं पदार्थप्रदर्शनपरञ्च सूचितम् । श्रौतपद्धतौ देवयाज्ञिकमहोदयेन च अस्यमतं सश्रद्धं समुपस्थापितम् । अतः भर्तृयज्ञः कात्यायनश्रौतसूत्रस्य भाष्यकार आसीदिति ज्ञायते।

### ५.११.२. वृद्धयाज्ञिकः यशोगोपी :

कात्यायनस्य अपरो भाष्यकारः कर्काचार्यः अस्यमतम् उल्लिख्य प्राचीनत्वं प्रामाणिकत्वं च स्वीकरोति।

यथा- **'कर्मभेदः स्यात् तत्र यशोगोपिप्रभृतिभाष्योपरोधः स्यात्' ... ... ... ...**।[४८७]

---

४८७. का.श्रौ.सू. २.१.७ (क.भाष्ये)।

### ५.११.३. आचार्यः पितृभूतिः

कात्यायनश्रौतसूत्रे पितृभूतिमहोदयस्यापि भाष्यम् उपलभ्यते। कर्कपेक्षया प्राचीनः पितृभूतिमहोदयः कात्यायनश्रौतसूत्रस्य प्रामाणिकं भाष्यञ्चकारेति मनीषिणां विचारः प्राप्यते। कर्कभाष्ये भूरिशः नामोल्लेखात् कर्कस्यापि आदरणीय आसीत् इत्यनुमीयते- **यत्र पितृभूत्याचार्येण यथासंख्यलक्षणं प्रकृत्य ... ...**[४८८] देवयाज्ञिकेन श्रौतसूत्रस्य पद्धतौ पितृभूतेः मतं सश्रद्धं गृहीतमिति दृश्यते। भाष्यमिदं सरस्वतीभवने वाराणस्यां हस्तलिखितावस्थायां प्राप्यते।

### ५.११.४. उपाध्यायपादः

असौ विद्वान् कात्यायनश्रौतसूत्रस्य भाष्यकारः आसीत्। पादशब्देन स्मरणात् असौ कर्काचार्यस्य गुरुरासीत् किमिति अनुमीयते। आचार्यः कर्कः सश्रद्धम्मिमाचार्यं स्मरति। सर्वत्र कर्कः उपाध्यायपादशब्देन अस्यमतं पुरस्करोति। याज्ञिकपद्धतौ च अस्य स्मरणात् असौ कात्यायनश्रौतसूत्रस्याधिकारिकः विद्वान् आसीदिति ज्ञायते।

### ५.११.५. कर्काचार्यः

असौ कात्यायनश्रौतसूत्रस्य प्रसिद्धः भाष्यकारः सर्वाङ्गपूर्णं भाष्यं कर्कस्यैवोपलभ्यते। अस्य विषये पूर्वमुक्तचरमेव।

### ५.११.६. हरिस्वामी

कात्यायनश्रौतसूत्रस्य भाष्यकारेषु हरिस्वामिनो नाम अपि स्मरणीयं विद्यते। अस्य भाष्यं कीदृशमासीत् कया रीत्या विषया विवृता आसन् इति न ज्ञायते। परन्तु देवयाज्ञिकः पद्धतौ अस्यमतं स्थले स्थले निर्दिशति। **इदं मे कर्मेदं वीर्यं देवदत्तोऽहं सन्तनवानीति हरिस्वामिनः**[४८९]।

---

४८८. दे.प.पृ. २६.७१.१४९।
४८९. का.श्रौ.सू. १.२.३ (क.भाष्ये)

### ५.११.७. गर्गशङ्करौ

कात्यायनश्रौतसूत्रे गर्गस्य शङ्करस्य च भाष्यमासीत् परमिदानीमनुपलब्धमस्ति । कात्यायनयज्ञपद्धतिविमर्शे मनोहरलालद्विवेदिना समुल्लिखितमस्ति।[४९०]

### ५.११.८. अनन्तदेवः

असौ भाष्यकारः स्वनामधन्योऽस्ति । अनेन रचितं कात्यायनश्रौतसूत्रं गुणान्वितं श्रौतसूत्रमर्मोद्घाटनपरं विद्यते। न चाद्यावधि प्रकाशनपथमानीतम्। असौ स्वयं महान् याज्ञिकः मीमांसकश्चासीत्। याज्ञिककुले उत्पन्नस्य अस्य कुलेऽपि बहवो यज्ञाः अभूवन्। अस्य भाष्यं सरस्वतीभवने वाराणस्यां हस्तलिखितरूपे विद्यते।

### ५.११.९. देवयाज्ञिकः

देवयाज्ञिकः महान् याज्ञिकः वेदविषयमर्मज्ञश्चासीत्। असौ भाष्यं पद्धतिञ्च निर्माय श्रौतपरम्परां रक्षितवान् अस्य परिचयः तृतीयाध्याये प्रदत्त एव।

### ५.११.१०. कल्याणदीक्षितः

कल्याणदीक्षितमहोदयेन कातीयश्रौतसूत्रे भाष्यं लिखितमिति श्रूयते परं अस्य भाष्यं नोपलभ्यते।

### ५.११.११. विद्याधरः

असौ आचार्यः भाष्यकारेष्वन्तिमः समग्रं भाष्यं विरचय्य श्रौतजगति नक्षत्रमिव चकासितो विद्यते। अस्य परिचयः तृतीयाध्याये द्रष्टव्यः।

## ५.१२. कात्यायनश्रौतसूत्रस्य पद्धतयः

कात्यायनश्रौतसूत्रमाधारीकृत्य विविधैः विद्वद्भिः पद्धतिः विरचिता प्राप्यते । तेषां संक्षिप्ता टीप्पणी निर्दिश्यते।

---

४९०. डा. मनोहरलाल द्विवेदी, पृ. २८।

**५.१२.१. पद्मनाभः—** असौ विद्वान् समग्रस्य श्रौतसूत्रस्य पद्धतिं रचयामास। अनेन रचितस्य पद्धतेर्नाम पद्मनाभीति।

**५.१२.२. महादेवः—** अस्य पद्धतेर्नाम श्रौतस्मारणकर्मपद्धतिः अस्ति।

**५.१२.३. पितृभूतिः—** अनेन संक्षिप्ता पद्धतिः रचिता।

**५.१२.४. मिश्राग्निहोत्रिन्—** अनेन रचिता पद्धतिः विस्तृता विद्यते परन्तु अग्निचयनयागप्रकरणं संक्षिप्तमस्ति।

**५.१२.५. श्रीदेवः—** अनेन रचिता पद्धतिः यज्ञवल्लभा अस्ति।

**५.१२.६. सम्प्रदाय शर्मा—** सम्प्रदायनाम्नी पद्धतिः समग्रस्य श्रौतसूत्रस्यास्ति।

**५.१२.७. भाणजी दीक्षित—** अनेन रचिता पद्धतिः अंशरूपेण प्राप्यते।

**५.१२.८. देवयाज्ञिकः—** अनेन रचिता पद्धति सर्वोत्कृष्टा वर्तते। समग्रस्य श्रौतसूत्रस्य विषये इयं पद्धतिः पथप्रदर्शनी अस्ति। चतुर्विंशतिअध्यायस्य षष्ठीकण्डिका पर्यन्तं मुद्रिता एव पद्धति प्राप्यते चेत् अवशिष्टा हस्तलिखितरूपा विद्यते।

## ५.१३. कात्यायनश्रौतसूत्रसंस्करणम्

१. आचार्यपट्टाभिरामशास्त्रिमहोदयेन सम्पाद्य लालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विश्वविद्यालयतः कर्कभाष्यसहितं प्रथमसंकरणं १९८२। पुनर्मुद्रितसंस्करणं २००९ खैष्टाब्दे प्रकाशितम्।

२. आचार्यदेवयाज्ञिकभाष्यसहितं अनुपलब्धस्थाने कर्कभाष्यृ सहितं कात्यायनश्रौतसूत्रं डा. अल्वेत वेवेरेण संशोध्य प्रकाशितं २०२९ वैक्रमाब्दे प्रकाशितम्।

३. विद्याधरशर्म्मणा विरचितं सरलावृत्तिसहितं १९९० खैष्टाब्दे वाराणसीतः प्रकाशितम्।

## ५.१४. भाष्यत्रयस्य वैशिष्ट्यम्

कर्कदेवयाज्ञिकविद्याधरभाष्येषु भाष्यानुरूपा विशिष्टाः गुणाः विद्यन्ते। येषां भाष्याणां गण्ना विशिष्टभाष्येषु भवति। विचारशैल्या प्रणयनशैल्या च भाष्यत्रयमेव

पातञ्जलसावरभाष्यसमतां यान्ति। अत्र विभिन्नविषयाणां वैचित्र्यं गाम्भीर्यं समाविष्टं प्राप्यते। भाष्यत्रयस्यैव स्थले स्थले भाष्यकारणां समालोचनपरायाः सूक्ष्मेक्षिकायाः निदर्शनं दृश्यते। भाष्यकाराणां विशेषता पदे पदे प्राप्यते। तत्र भवद्भिः भाष्यकारैः सूत्रकारस्याशयं प्रकटयितुं निर्व्याजात्मकः प्रयाशः प्रदर्शितः। संहिताब्राह्मणगतभावानुरूपं सूत्रार्थं प्रकाशयितुं परमं कर्तव्यं स्मृतमिति च प्रष्टमेव। सर्वेषां सूत्राणां सार्थकता, सूत्रगतपानामुपयोगिता च त्रिष्वेव भाष्येषु प्रकटिता विद्यते। सूत्रेषु प्रतीयमानस्य विरोधस्य परिहारः तथा शङ्कासमाधिश्वं च नैजेन गीर्वाणवाणीशक्त्या मीमांसासख्या विहित इति सर्वत्र प्रतीयते। सूत्रगत भावबोधनाय शास्त्रान्तरवचनानां उदाहरणप्रत्युदाहरणानां चोपस्थितिः भाष्यकारैः कृता। भाष्येषु शास्त्रीयविषयाणां श्रौतसूत्रस्य प्रयोजनं, परिभाषासूत्राणां विवृत्तिः यागानां स्वरूपं, पात्राणां परिचयः, यागपरिचयः, अनुष्ठानविषयश्चेते विषयाः सारल्येन प्रतिपादिताः।

### ५.१५. यज्ञस्य वैज्ञानिको विचारः

**दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत** इति विधिवाक्यं स्वर्गफलार्थिनं यजमानं प्रति साङ्गोपाङ्गदर्शपूर्णमासयागं साधनत्वेन विदधाति। पूर्वमीमांसकैः स्वर्गसाध्यका, दर्शपूर्णमासकरणका, प्रयाजानूयाजाद्यङ्गकर्मेतिकर्तव्यताका भावना अनेन वाक्येन अभिहिता इति सिद्धान्तितम्।

एकैकस्मै कामाय अन्याः इष्टयः आह्रियन्ते, सर्वेभ्यो दर्शपूर्णमासौ इत्यनेन सर्वफलसाधनत्वं दर्शपूर्णमासयागे अस्तीति प्रतिपादितं वर्तते। सर्वफलन्तु मोक्षसाम्राज्यमेव, तच्च दुःखेन न संभिन्नम्, अनन्तरञ्च न ग्रस्तम् अभिलाषोपनीतं च भवतीति स्वर्ग पदेनापि अभिधातुं शक्यते, अर्थात् दर्शपूर्णमासयागानुष्ठानेन धीशुध्या ज्ञानप्राप्तिद्वारा आत्मसाक्षात्कारेण ब्रह्मानन्दोऽपि सम्पादितुं शक्यते इति अवगम्यते।

दर्शपूर्णमासयागयोर्मध्ये प्रथमः दर्शयागः, अनुष्ठाने तु पूर्वं पौर्णमासीयागः, तदनु दर्शः करणीयः। एतच्च **यत् पौर्णमासीं पूर्वामालभेत** इत्यादिना वेदेनाभिहितं भवति। अर्थात् अमावास्यायामारभ्य शुक्लप्रतिपदि समाप्यते दर्शेष्टिः, पौर्णमास्यामारभ्य कृष्णप्रतिपदि च परिसमाप्यते पूर्णमासेष्टिः। **दर्शः सूर्येन्दुसङ्गमः** इति कोशः, स च अमावास्यादिने भवतीत्यत्र

ज्योतिषशास्त्रं प्रमाणम्। पुरा देवेभ्यः तिरोभूतः स्वर्गः। तैः सम्प्रार्थितेन प्रजापतिना यज्ञक्रतुभिः न सम्पादितः, अपि तु इष्टिभिः सम्पादितः स्वर्गः इति निश्चप्रचं प्रोक्तम्। **देवेभ्यो वै स्वर्गो लोकस्तिरोऽभवत्, ते प्रजापतिमब्रुवन्, प्रजापते स्वर्गो वै नो लोकस्तिोऽभूत्, तमन्विच्छेति, न यज्ञक्रतुभिरन्वैच्छत्, तं यज्ञक्रतुभिर्नान्वविन्दत्, तमिष्टिभिरन्वैच्छत्, तमिष्टिभिरन्वविन्दत्, तदिष्टीनामिष्टित्वम्, ऐष्टयो ह वैनाम्, ता इष्टय इत्याचक्षते न परोक्षेण, परोक्षप्रिया इव हि देवाः** इत्यादिश्रुतिवाक्येन यज्ञक्रतुभ्योऽपि इष्टीनां दर्शपूर्णमासेष्ट्यादीनां वैशिष्ट्यं सुस्पष्टं वर्तते इति अवगम्यते।

प्रकृते श्रीकृष्णयजुर्वेदस्य **इषे त्वा** इति मन्त्रेण समारब्धेः, दर्शयागे त्रीणि प्रधानहवींषि सन्ति, आग्नेयः अष्टाकपालः पुरोडाशः, ऐन्द्रं दधि, ऐन्द्रं पयः इति। कृष्णयजुर्वेदेन कर्मान्तरं परित्यज्य दर्शपूर्णमासेष्टिरेव प्रथमं कुतः आरब्धा इति आशङ्कायां तस्य कर्मणः प्रकृतित्वात्, निरपेक्षत्वाच्च इति समाधानं, प्रकर्षेण अङ्गोपदेशः यत्र क्रियते सा प्रकृतिः कृत्स्नाङ्गविषयत्वमेव उपदेशस्य प्रकर्षः **प्रकृतिवत् विकृतिः कर्तव्या** इति न्यायात् विकृतिषु अतिदेशेन अङ्गानां प्राप्तत्वात्तत्र विशेषाङ्गोपदेश एव क्रियते अतः विकृतिषु प्रकर्षाभावः। सा च प्रकृतिः श्रीकृष्णयजुर्वेदे त्रिविधा, अग्निहोत्रं, इष्टिः, सोमश्चेति। त्रिष्वपि एतेषु प्रकृतिकर्मसु अन्यनैरपेक्ष्येण स्वाङ्गजातं सर्वमुपदिष्टम्।

एतेषु त्रिषु प्रकृतिकर्मसु मध्ये कस्य वा प्रथमभावित्वमिति विचारिते सति, सोमयागस्य स्वरूपेण अन्यैरपेक्ष्येऽपि, अङ्गेषु दीक्षणीयाप्रायणीयाप्रभृतिषु इष्टिसु तासां विकृतिकर्मत्वात् प्रकृतिभूतदर्शपूर्णमासयागापेक्षा अस्तीति न पूर्वभावित्वं युक्तम्।

दर्शपूर्णमासयागस्य तु सोमयागनिरपेक्षत्वात् सोमात् प्राचीनत्वं युक्तम्। यद्यपि अग्निहोत्रस्य स्वरूपे, अङ्गेषु वा अन्यापेक्षा नास्ति, तथापि तस्य कर्मणः अग्निसिध्यपेक्षत्वात्, आहवनीयादित्रेताग्नीनां च पवमानेष्टिसाध्यत्वात्, पवमानेष्टिनां च दर्शपूर्णमासविकृतित्वात्, परम्परया अग्निहोत्रस्य दर्शपूर्णमासापेक्षा अस्तीति तस्य कर्मणः प्रथमभावित्वं न युक्तम्।

दर्शपूर्णमासयोरपि अग्निसाध्यत्वात्, अग्निसाधकमाधानं प्रथमतः वक्तव्यमित्याशङ्का नैव कार्या, यतो हि न आधानमात्रेण अग्नयः सिध्यन्ति, किन्तु पवमानेष्टिभिरपि, ताश्च पवमानेष्टयः दर्शपूर्णमासविकृतित्वात् साक्षादेव दर्शपूर्णमासौ अपेक्षन्ते, दर्शपूर्णमासौ तु

अग्न्युत्पादनद्वारा पवमानेष्टिसापेक्षावपि न साक्षात्ताः अपेक्षन्ते । अतः निरपेक्षत्वात् प्रकृतित्वाच्च दर्शपूर्णमासेष्टिरेव प्रथमं वक्तव्या । तत्र दर्शपूर्णमासेष्टिमन्त्राः आध्वर्यवाः, याजमानाः, हौत्रा इति त्रिविधाः, तत्रापि याजमानहौत्रमन्त्राणां चित्रस्थानीयत्वात्, भित्तिस्थानीयाः ते च आध्वर्यवमन्त्राः श्रीकृष्णयजुर्वेदे इषे त्वा इत्यादिना आरभ्य प्रथमकाण्डप्रथमप्रश्ने संहिताभागे त्रयोदशसु अनुवाकेषु पठिताः, प्रथमानुवाके वत्सापाकरणार्थाः, द्वितीये बर्हिस्सम्पादनार्थाः, तृतीये दोहनार्थाः, चतुर्थे हविर्निर्वापार्थाः, पञ्चमे व्रीह्यवधानार्थाः, षष्ठे तण्डुलपेषणार्थाः, सप्तमे कपालोपधानार्थाः, अष्टमे पुरोडाशनिष्पादनार्थाः, नवमे वेदिकरणार्थाः, दशमे प्राधान्येन आज्यग्रहणार्थाः, प्रसङ्गात्पत्नीसन्नहनार्थाः, स्मृतत्वे सति उपेक्षानर्हत्वं प्रसङ्गः एकादशे प्राधान्येन इध्मसन्नहनार्थाः, बर्हिरास्तरणाद्यर्थाश्च, द्वादशे आघारार्थाः । अत्र सामिधेनी-प्रयाज-आज्यभागप्रधानयागादिमन्त्राणां प्राप्तावसरत्वेपि तेषां हौत्रत्वात्, तानुपेक्ष्य उपरितनप्रयोगाङ्गभूताः आध्वर्यवमन्त्राः स्रुग्व्यूहनादयः त्रयोदशे अनुवाके समाम्नाताः । अत्र इषेत्वा इति प्रथममन्त्रेण ब्राह्मणपर्यालोचनया इषे त्वेति शाखामाच्छिनत्ति इति कल्पसूत्रकारवचनानुसारं पलाशशाखाच्छेदनं कर्तव्यम् ।

किमर्थं पलाशशाखासम्पादनं इत्याशङ्कायां तद्विचार एवं वर्तते— पलाशशाखया 'गोवत्सअपाकरणम्' करणीयम् । तदैव वत्सानां स्वमातृभिस्सह विद्यमानानां पीतक्षीराणां तृणभक्षणार्थं तृणसमृद्धिप्रदेशं प्रति सम्प्रेषणं सिद्ध्यति । दर्शयागे प्रधानयागेषु त्रिषु सान्नाय्ययागः इन्द्रदेवताकः । अत्र स्मर्यते 'अथ प्रजानां' महेन्द्रदेवताकश्च वर्तते । सान्नाय्यं दधिपयसी इति स यागः, दध्ना, पयसा च कर्तव्यः । एवं च प्रतिपदि, प्रातःकाले दर्शेष्टौ दधिहोमार्थं दधि सम्पादनीयम्, प्रतिपदि प्रातः दधिसम्पादनीयञ्चेत् अमावास्यायां रात्रौ गावः दोग्धव्याः, क्षीरं च सम्पादनीयम्, अमावास्यारात्रौ क्षीरमावश्यकं चेत् अमावास्याप्रातः लौकिकदोहादूर्ध्वं गोभिः सवत्सैः गोचरे तृणसमृद्धप्रदेशे सम्यक् तृणभक्षणरूपम् आहारं देवताहविःप्रदानार्थं स्वीकर्तव्यम् । तदर्थं मातृरूपाः गावः, वत्सरूपाश्च गावः पृथक्कर्तव्याः, इदमेव वत्सापाकरणम् । यथोक्तरीत्या अस्य सर्वप्राथम्यं च । तदिदं वत्सापाकरणं सद्यश्छिन्नपलाशशाखया कर्तव्यमिति वेदमन्त्रतात्पर्यम् ।

पलाशशाखयैव कुतः, अन्या समित् नास्ति वा इति चेत्, पलाशस्य अत्यन्तं महत्त्वं वैज्ञानिकत्त्वं च वेदे सुप्रसिद्धम्। तृतीयस्यामितो दिवि सोम आसीत्, तं गायत्र्याहरत्, तस्य पर्णमच्छिद्यत, तत्पर्णोऽभवत्, तत्पर्णस्य पर्णत्वम् अनेन विज्ञायते अमृतस्वरूपस्य सोमस्य, द्युलोके विद्यमानस्य, गायत्र्या छन्दसा पक्षिरूपेण स्वमातुः दास्यापनयनार्थं लतारूपेण भूलोकं समानीतस्य पर्णस्य भूमौ पतिनं, तादृशपर्णस्यैव ईश्वरसङ्कल्पात् भूमौ पलाशवृक्षरूपेण आविर्भूतत्वात्पलाशस्य अमृतमयसोमरूपत्वं पर्णादुत्पन्नत्वेन पर्णनाम्ना प्रसिद्धिश्च।

पलाशवृक्षस्य अधस्तादुपविश्य देवैः ब्रह्मतत्त्वं निरूपितम्, तच्च पर्णेनापि सम्यक्श्चुतम्, अतः पर्णः ब्रह्मैव, इति। ब्रह्मा वै पर्णः, यत्पर्णशाखया वत्सानपाकरोति, ब्रह्मणैवैनानपाकरोति इति। देवा वै ब्रह्मनवदन्त, तत्पर्ण उपाशृणोत्, सुश्रवा वै नाम इति मन्त्रैः निरूपितम्, पलाशस्य सुश्रवा इति च नाम सम्पन्नम्।

उपनयने ब्रह्मचारी पलाशदण्डधारणं करोति, मन्त्रं च एवं पठति। सुश्रवस्सुश्रवसं मा कुरु यथा त्वगँ सुश्श्रवस्सुश्श्रवा अस्येवमहगँ सुश्श्रवस्सुश्श्रवाभूयासं, यथात्वगं सुश्श्रवस्सुश्श्रवो देवानां निधिगोपोऽस्येवमहं ब्राह्मणानां ब्रह्मणो निधिगोपो भूयासम् इति। हे पलाशशाखे देवानां निधिं ब्रह्माणं यथा त्वं धारयसि, रक्षकोऽसि, एवमेव अहं ब्रह्मचारी उपनीतः ब्राह्मणानां, वेदमन्त्रद्रष्टृणां, वेदस्य निखिलविज्ञानात्मकस्य सर्वविद्यासाररूपस्य धारयिता रक्षकश्च त्वदनुग्रहेण भूयासम्, एवं पर्णनाम्नि पलाशे गायत्रीसम्बन्धः वेदगम्यः सोमाहरणेन अस्ति अनुमानगम्योऽपि अपरः सम्बन्धः वर्तते, वेदत्रयसारभूतेषु गायत्रीमन्त्रपदेषु त्रित्वमिव पलाशपर्णेषु त्रित्वं वर्तते।

अत एवोच्यते गायत्रो वै पर्णः, गायत्राः पशवः, तस्मात्त्रीणि त्रीणि पणस्य पलाशानि, त्रिपदा गायत्री, यत्पर्णशाखया गाः प्रार्पयति, स्वयैवैना देवतया प्रार्पयति इति। अर्थात् त्रित्वसाम्यात् पर्णः गायत्रः, पर्णशाखासम्पादनं, तथा वत्सापाकरणाद्यनुष्ठानं नाम, गायत्रीदेवतामयं सर्वं कर्म सुशोभनं सुसम्पन्नं च कृतं भवतीति।

एवं रीत्या दर्शेष्टौ उपयुज्यमानपलाशशाखायामेव एतादृशं महत्त्वं, वैज्ञानिकत्वञ्च वर्तते, अवशिष्टे कर्मणि कीदृशं महत्त्वं, वैज्ञानिकत्वं चेत्यद्भूतमाश्चर्यम्।

एतावता सङ्ग्रहेण दर्शेष्टिविषयकवैज्ञानिकविचारेण विरमामि, यज्ञरूपो भगवान् श्रीनिवासः सर्वानस्माननुगृह्णातु।

**ब्रह्मणे गार्हपत्याय विष्णवे दक्षिणाग्नये।**
**शिवायाहवनीयाय शक्त्यै वेद्यै नमो नमः॥**

इति शम्

——— 0 ———